This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2319 विषय _____

नाँव शिक्षादिवेदषडंग (सुद्रित)

लेखक / लिपीकार _____

पृठ 16 काळ इ.स. 1914 पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ शिक्षादिवेदषडंगप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदषडंगानामनुक्रमणिका ।

विषयः		पृष्ठं.
१ शिक्षा	पाणिनीया	१–३
२ ज्योतिषं	लगधस्य	४–५
३ छंदः	पिंगलनागस्य	६–८
४ निघंटुः	यास्कस्य	९–१६
,, निरुक्तं पूर्वषट्कं	यास्कस्य	१–३६
,, निरुक्तं उत्तरषट्कं	यास्कस्य	१–४२
५ श्रौतसूत्रं पूर्वषट्कं	आश्वलायनीयं	१–४२
उत्तरषट्कं		१–२६
,, गृह्यसूत्रं	आश्वलायनीयं	१–१८
६ अष्टाध्यायी (सूत्रपाठः)	पाणिनीया	१–३६

इमानि पुस्तकानि प्राचीनपुस्तकैः वैदिकपाठक्रमेण संवाद्य वैदिकद्वारा च संशोध्य तत्र श्रौतसूत्रमेतावंतं केनाप्यमुद्रितं च मुद्रयित्वाऽध्येतृवर्गसौलभ्यायास्माभिर्मुद्रितानि । मूल्यं १।.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथशिक्षा–पाणिनीया ।

श्रीगणेशायनमः ॥ ॥ हरिः ॐ ॥ अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतंयथा ॥ शास्त्रानुपूर्वतद्विद्याद्यथोक्तंलोक-वेदयोः ॥ प्रसिद्धमपिशब्दार्थमविज्ञातमबुद्धिभिः ॥ पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिं ॥ त्रिषष्टिश्चतुःषष्टि-र्वावर्णाःशंभुमतेमताः ॥ प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा ॥ स्वरावींशतिरेकश्चस्पर्शानांपंचविंशतिः ॥ यादयश्चस्मृताह्यष्टौचत्वारश्चयमाःस्मृताः ॥ अनुस्वारोविसर्गश्चx क xपौचापिपराश्रितौ ॥ दुःस्पृष्टश्चेतिविज्ञेयोलृ-कारःप्लुतएवच ॥ १ ॥ आत्माबुध्यासमेत्यार्थान्मनोयुङ्क्तेविवक्षया ॥ मनःकायाग्निमाहंतिसप्रेरयतिमारुतम् ॥ मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरम् ॥ प्रातःसवनयोगंतंछंदोगायत्रमाश्रितम् ॥ कंठेमाध्यंदिनयुगंमध्यमंत्रैष्टुभा-नुगम् ॥ तारंतार्तीयसवनंशीर्षण्यंजागतानुगम् ॥ सोदीर्णोमूर्ध्न्यभहतोवक्त्रमापद्यमारुतः ॥ वर्णान्जनयतेतेषांवि-भागःपंचधास्मृतः ॥ स्वरतःकलातःस्थानात्प्रयत्नानुप्रदानतः ॥ इतिवर्णविदःप्राहुर्निपुणंतन्निबोधत ॥ २ ॥ उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः ॥ ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअचि ॥ उदात्तेनिषादगांधारावनुदा-त्तऋषभधैवतौ ॥ स्वरितप्रभवाह्येतेषड्जमध्यमपंचमाः ॥ अष्टौस्थानानिवर्णानामुरःकंठःशिरस्तथा ॥ जिह्वामूलं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चदंताश्चनासिकोष्ठौचतालुच ॥ ओभावश्चविवृत्तिश्चशषसारेफएवच ॥ जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः ॥ यद्योभावप्रसंधानमुकारादिपरंपदं ॥ स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्मणः ॥ ३ ॥ हकारंपंचमैर्युक्तमंतःस्थाभिश्चसंयुतं ॥ औरस्यंतंविजानीयात्कंठ्यमाहुरसंयुतं ॥ कंठ्यावहाविचुयशास्तालव्याओष्ठजावुपू ॥ स्युर्मूर्धन्याऋटुरषादंत्यालृतुलसाःस्मृताः ॥ जिह्वामूलेतुकुःप्रोक्तोदंत्योष्ठ्योवःस्मृतोबुधैः ॥ एऐतुकंठतालव्याओऔकंठोष्ठजौ स्मृतौ ॥ अर्धमात्रातुकंठ्यास्यादेकारैकारयोर्भवेत् ॥ ओकारौकारयोर्मात्रातयोर्विवृतसंवृतं ॥ संवृतंमात्रिकंज्ञेयं-विवृतंतुद्विमात्रिकं ॥ घोषावासंवृताःसर्वेअघोषाविवृताःस्मृताः ॥ ४ ॥ स्वराणामूष्मणांचैवविवृतंकरणंस्मृतं ॥ तेभ्योपिविवृतावेडौताभ्यामैचौतथैवच ॥ अनुस्वारयमानांचनासिकास्थानमुच्यते ॥ अयोगवाहाविज्ञेयाआश्रय-स्थानभागिनः ॥ अलाबुवीणानिर्घोषोदंत्यमूल्यस्वराननु ॥ अनुस्वारस्तुकर्तव्योनित्यंह्योःशषसेषुच ॥ अनुस्वारे-विवृत्यांतुविरामेचाक्षरद्वये ॥ द्विरोष्ठ्यौतुविगृह्णीयाद्यत्रौकारवकारयोः ॥ व्याघ्रीयथाहरेत्पुत्रान्दंष्ट्राभ्यांनचपी-डयेत् ॥ भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयोजयेत् ॥ ५ ॥ यथासौराष्ट्रिकानारीतक्रँइत्यभिभाषते ॥ एवंरंगाःप्रयो-क्तव्याःखेअराँइवखेदया ॥ रंगवर्णंप्रयुंजीरन्नोग्रसेत्पूर्वमक्षरं ॥ दीर्घस्वरंप्रयुंजीयात्पश्चान्नासिक्यमाचरेत् ॥ हृदये-चैकमात्रस्त्वर्धमात्रस्तुमूर्धनि ॥ नासिकायांतथार्धंचरंगस्यैवंद्विमात्रता ॥ हृदयादुत्करेतिष्ठन्कांस्येनसमनुस्वरन् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मार्दवंचद्विमात्रंचजघन्याँइतिनिदर्शनं ॥ मध्येतुकंपयेत्कंपमुभौपार्श्वौसमौभवेत् ॥ सरंगंकंपयेत्कंपंरथीवेतिनिद-
र्शनं ॥ एवंवर्णाःप्रयोक्तव्यानाव्यक्तानचपीडिताः ॥ सम्यग्वर्णप्रयोगेणब्रह्मलोकेमहीयते ॥ ६ ॥ गीतीशीघ्री
शिरःकंपीतथालिखितपाठकः ॥ अनर्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः ॥ माधुर्यमक्षरव्यक्तिःपदच्छेदस्तुसुस्वरः ॥
धैर्यंलयसमर्थंचषडेतेपाठकागुणाः ॥ शंकितंभीतमुद्धृष्टमव्यक्तमनुनासिकं ॥ काकस्वरंशिरसिगतंतथास्थानविव-
र्जितं ॥ उपांशुदष्टंत्वरितंनिरस्तंविलंबितंगद्गदितंप्रगीतं ॥ निष्पीडितंग्रस्तपदाक्षरंचवदेन्नदीनंनतुसानुनास्यं ॥
प्रातःपठेन्नित्यमुरःस्थितेनस्वरेणशार्दूलरुतोपमेन ॥ मध्यंदिनेकंठगतेनचैवचक्राह्वसंकूजितसंनिभेन ॥ तारंतुविद्या-
त्सवनंतृतीयंशिरोगतंतच्चसदाप्रयोज्यं ॥ मयूरहंसान्यभृतस्वराणांतुल्येननादेनशिरःस्थितेन ॥ ७ ॥ अचोस्पृष्टाय-
णस्त्वीषन्नेमस्पृष्टाशर्लःस्मृताः ॥ शेषाःस्पृष्टाहलःप्रोक्तानिबोधानुप्रदानतः ॥ ञमोनुनासिकानह्नोनादिनोहझषः
स्मृताः ॥ ईषन्नादायणंजश्चश्वासिनस्तुखफादयः ॥ ईषच्छ्वासांश्चरोविद्याद्ऊर्धामैतत्प्रचक्षते ॥ दाक्षीपुत्रःपाणिनि-
नायेनेदंव्यापितंभुवि ॥ छंदःपादौतुवेदस्यहस्तौकल्पोथपठ्यते ॥ ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते ॥ शिक्षा-
घ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं ॥ तस्मात्सांगमधीत्येवब्रह्मलोकेमहीयते ॥ ८ ॥ उदात्तमाख्यातिवृषोंगुलीनांप्रदे-
शिनीमूलनिविष्टमूर्धा ॥ उपांतमध्येस्वरितंधृतंचकनिष्ठिकायामनुदात्तमेव ॥ उदात्तंप्रदेशिनींविद्यात्प्रचयंमध्यतों-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुलिं ॥ निहतंतुकनिष्ठिक्यास्वरितोपकनिष्ठिकां ॥ अंतोदात्तमाद्युदात्तमुदात्तमनुदात्तंनीचस्वरितं ॥ मध्योदात्तं-
स्वरितंद्व्युदात्तंत्र्युदात्तमितिनवपदशय्या ॥ अग्निःसोमःप्रवोवीर्यंहविषांस्वर्बृहस्पतिरिंद्राबृहस्पती ॥ अग्निरित्यंतो-
दात्तंसोमइत्याद्युदात्तंप्रेत्युदात्तंवइत्यनुदात्तंवीर्यंनीचस्वरितं ॥ हविषांमध्योदात्तंस्वरितिस्वरितं ॥ बृहस्प-
तिरितिद्व्युदात्तमिंद्राबृहस्पतीइतित्र्युदात्तं ॥ अनुदात्तोहृदिज्ञेयोमूर्ध्न्युदात्तउदाहृतः ॥ स्वरितःकर्णमूलीयःस-
र्वास्येप्रचयःस्मृतः ॥ ९ ॥ चाषस्तुवदतेमात्रांद्विमात्रंत्वेववायसः ॥ शिखीरौतित्रिमात्रंतुनकुलस्त्वर्धमात्रकं ॥
कुतीर्थादागतंदग्धमपवर्णंचभक्षितं ॥ नतस्यपाठेमोक्षोस्तिपापाहेरिवकिल्बिषात् ॥ सुतीर्थादागतंव्यक्तंस्वाम्नाय्यं-
सुव्यवस्थितं ॥ सुस्वरेणसुवक्त्रेणप्रयुक्तंब्रह्मराजते ॥ मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह ॥ सवाग्व
ज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधात् ॥ अवक्षरंहनायुष्यंविस्वरंव्याधिपीडितं ॥ अक्षताशस्त्ररूपेणवज्रंप-
ततिमस्तके ॥ हस्तहीनंतुयोधीतेस्वरवर्णविवर्जितं ॥ ऋग्यजुःसामभिर्दग्धोवियोनिमधिगच्छति ॥ हस्तेनवेदंयोधीते-
स्वरवर्णार्थसंयुतं ॥ ऋग्यजुःसामभिःपूतोब्रह्मलोकेमहीयते ॥ १० ॥ शंकरःशांकरींप्रादाद्दाक्षीपुत्रायधीमते ॥
वाङ्मयेभ्यःसमाहृत्यदेवींवाचमितिस्थितिः ॥ येनाक्षरसमाम्नायमधिगम्यमहेश्वरात् ॥ कृत्स्नंव्याकरणंप्रोक्तंतस्मै-
पाणिनयेनमः ॥ येनधौतागिरःपुंसांविमलैःशब्दवारिभिः ॥ तमश्चाज्ञानजंभिन्नंतस्मैपाणिनयेनमः ॥ अज्ञानांधस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकस्यज्ञानांजनशलाकया ॥ चक्षुरुन्मीलितंयेनतस्मैपाणिनयेनमः ॥ त्रिनयनमभिमुखनिःसृतामिमांयइहपठेत्प्रयतश्चसदाद्विजः ॥ सभवतिधनधान्यपशुपुत्रकीर्तिमानतुलंचसुखंसमश्नुतेदिवीतिदिवीति ॥ ११ ॥ अथशिक्षामात्मोदात्तश्चहकारंस्वराणांयथागीत्यचोस्पृष्टोदात्तंचाषस्तुशंकरएकादश ॥ ॥ इतिपाणिनीयशिक्षासमाप्ता ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इतिपाणिनीयशिक्षासंपूर्णा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथज्योतिषं–लगधः ।

श्रीगणेशायनमः ॥ हरिः ॐ ॥ पंचसंवत्सरमयंयुगाध्यक्षंप्रजापतिं ॥ दिनर्त्वयनमासांगंप्रणम्यशिरसाशुचिः ॥ प्रणम्यशिरसाकालमभिवाद्यसरस्वतीं ॥ कालज्ञानंप्रवक्ष्यामिलगधस्यमहात्मनः ॥ ज्योतिषामयनंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः ॥ विप्राणांसंमतंलोकेयज्ञकालार्थसिद्धये ॥ निरेकंद्वादशार्धाब्दंद्विगुणंगतसंज्ञिकं ॥ षष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांराशिरुच्यते ॥ स्वरार्कमेकेसोमार्कौयदासाकंसवासवौ ॥ स्यात्तदादियुगंमाघस्तपःशुक्लोदिनंत्यजः ॥ १ ॥ प्रपद्येतेश्रविष्ठादौसूर्याचांद्रमसावुदक् ॥ सार्पार्धेदक्षिणार्कस्तुमाघश्रावणयोःसदा ॥ घर्मवृद्धिरपांप्रस्थःक्षपाह्रासउदग्गतौ ॥ दक्षिणेतौविपर्यस्तौषण्मुहूर्त्ययनेनतु ॥ द्विगुणंसप्तमंचाहुरयनाद्यंत्रयोदश ॥ चतुर्थंदशमंचैवद्विर्युग्माद्यंबहुलेप्यृतौ ॥ वसुस्त्वष्टाभगोजश्चमित्रःसर्पाश्विनौजलं ॥ धाताकश्चायनाद्याश्चार्धपंचनभस्त्वृतुः ॥ भांशाःस्युरंष्टकाःकार्याःपक्षाद्वादशचोद्गताः ॥ एकादशगुणःस्योनःशुक्लेर्धंचैंदवायदि ॥ २ ॥ कार्याभांशाष्टकास्थानेकलाएकान्नविंशतिः ॥ ऊनस्थानेद्विसप्ततीरुद्रपेदूनसंमिताः ॥ त्र्यहंशीभशेषोदिवसांशभागश्चतुर्दशस्याप्युपनीतभिन्नं ॥ भार्धेधिकेचाधिगतेपरेंशेद्वावुत्तमैकंनवकैरवेद्यं ॥ पक्षात्पंचदशाच्चोर्ध्वंतद्युक्तमितिनिर्दिशेत् ॥ नवभिस्तूद्गतोंशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यादूनांशब्यधिकेनतु ॥ जौद्राघःखेश्वेहीरोषाचिन्मूषण्यःसोमाधानः ॥ रेमृध्राश्वाओजस्तृष्वोहर्येष्ठाइत्यृक्षालिंगैः ॥ जाबाद्यंशैःसमंविद्यात्पूर्वार्धेपार्वसूत्तरे ॥ भादानांशाच्चतुर्दशीकाष्ठानांदेविनाकलाः ॥ ३ ॥ कलादशचविंशास्याद्विमुहूर्तस्तुनाडिके ॥ द्वित्रिंशस्तत्कलानांतुषट्शतीत्र्यधिकंभवेत् ॥ नाडिकेद्वेमुहूर्तस्तुपंचाशत्पलमाषकं ॥ माषकात्कुंभकोद्रोणःकुटपैर्वर्धतेत्रिभिः ॥ ससप्तकुंभयुक्स्योनःसूर्याद्योनिंत्रयोदश ॥ नवमानिचपंचाह्नःकाष्ठाःपंचाक्षराःस्मृताः ॥ श्रविष्ठाभ्यांगुणाभ्यस्तान्प्राग्विलग्नान्विनिर्दिशेत् ॥ सूर्यान्मासान्षळभ्यस्तान्विद्याच्चांद्रमसानृतून् ॥ अतीतपर्वभागेषुशोधयेद्विगुणांतिथिं ॥ तेषुमंडलभागेषुतिथिनिष्ठांगतोरविः ॥ ४ ॥ याःपर्वभादानकलास्तासुसप्तगुणांतिथिं ॥ प्रक्षिपेत्कलासमूहस्तुविद्यादादानकीःकलाः ॥ यदुत्तरस्यायनतोयनंस्याच्छेषंतुयद्दक्षिणतोयनस्य ॥ तदेवषष्ट्याद्विगुणंद्विभक्तंसद्वादशंस्याद्दिवसप्रमाणं ॥ तदर्धदिनभागानांसदापर्वणिपर्वणि ॥ ऋतुशेषंतुतद्विद्यात्संख्यायसहपर्वणां ॥ इत्युपायसमुद्देशोभूयोप्येनंप्रकल्पयेत् ॥ ज्ञेयराशिंगताभ्यस्तान्विभजेज्ज्ञानराशिषु ॥ अग्निःप्रजापतिःसोमोरुद्रोदितिर्बृहस्पतिः ॥ सर्पाश्चपितरश्चैवभगश्चैवार्यमापिच ॥ ५ ॥ सवितात्वष्टाथवायुश्चेंद्राग्नीमित्रएवच ॥ इंद्रोनिर्ऋतिरापोवैविश्वेदेवास्तथैवच ॥ विष्णुर्वसवोवरुणोजएकपात्तथैवच ॥ अहिर्बुध्न्यस्तथापूषाश्विनौयमएवच ॥ नक्षत्रदेवताएताएताभिर्यज्ञकर्मणि ॥ यजमानस्यशास्त्रज्ञैर्नामनक्षत्रजंस्मृतं ॥ इत्येतन्मासवर्षाणां-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुहूर्तोदयपर्वणां ॥ दिनर्त्वयनमासांगंव्याख्यातंलगधोब्रवीत् ॥ सोमसूर्यस्त्रिचरितोलोकाँल्लोकेचसंमितं ॥ सोमसूर्यस्त्रिचरितोविद्वान्वेदविदश्नुते ॥ ६ ॥ विषुवंतद्ध्रुणंद्वाभ्यांरूपहीनंतुषड्ध्रुणं ॥ यल्लब्धंतानिपर्वाणितथोर्ध्वंसातिथिर्भवेत् ॥ माघशुक्लप्रवृत्तस्तुपौषकृष्णसमापिनः ॥ युगस्यपंचवर्षाणिकालज्ञानंप्रचक्षते ॥ तृतीयांनवमींचैवपौर्णमासींत्रयोदशीं ॥ षष्ठींचविषुवांप्रोक्तोद्वादश्यांचसमंभवेत् ॥ चतुर्दशीमुपवसथस्तथाभवेद्यथोदितोदिनमुपैतिचंद्रमाः ॥ माशुक्लाह्निकोयुंक्तेश्रविष्ठायांचवार्षिकीं ॥ यथाशिखामयूराणांनागानांमणयोयथा ॥ तद्वद्वेदांगशास्त्राणांज्योतिषंमूर्धनिस्थितं ॥ वेदाहियज्ञार्थमभिप्रवृत्ताःकालानुपूर्वाविहिताश्चयज्ञाः ॥ तस्मादिदंकालविधानशास्त्रंयोज्योतिषंवेदसवेदयज्ञान्योज्योतिषंवेदसवेदयज्ञानिति ॥ ७ ॥ ॥ पंचसंवत्सरंप्रपद्ये तेकार्याःकलादशचयाःपर्वसवितविषुवंसप्त ॥ ॥ इतिवेदांगज्योतिषंसमाप्तम् ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इतिवेदांगज्योतिषंसंपूर्णं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथछन्दः–पिंगलनागः ।

श्रीगणेशायनमः ॥ हरिःॐम् ॥ मयरसतजभनलगसंमितंभ्रमतिवाङ्मयंजगतियस्य ॥ सजयतिपिंगलनागःशि-
वप्रसादाद्विशुद्धमतिः ॥ त्रिगुरुंविद्धिमकारंलघ्वादिसमन्वितंयकाराख्यं ॥ लघुमध्यमंतुरेफंसकारमंतेगुरुनिबद्धं ॥
लघ्वंत्यंहितकारंजकारमुभयोर्लघुंविजानीयात् ॥ आदिगुरुंचभकारंनकारमिहपैंगलेत्रिलघुं ॥ दीर्घसंयोगपरंतथा-
स्वरव्यंजनांतमूष्मांतं ॥ सानुस्वारंचगुरुंक्वचिदवसानेपिलघ्वंत्यं ॥ आदिमध्यावसानेषुयरतायांतिलाघवं ॥ भज-
सागौरवंयांतिमनौतुगुरुलाघवं ॥ त्रिविरामंदशवर्णंषण्मात्रमुवाचपिंगलःसूत्रं ॥ छंदोवर्गपदार्थप्रत्ययहेतोश्चशा-
स्त्रादौ ॥ १ ॥ धीश्रीस्त्रीम् । वरासाय् । कागुहार् । वसुधास् । सातेक्त् । कदासज् । किंवदभ् । नहसन् ।
गृल् । गंते । ध्रादिपरः । हे । लौसः । ग्लौ । अष्टौवसवइति ॥ २ ॥ छंदः । गायत्री । दैव्येकं । आसुरीपंच-
दश । प्राजापत्याष्टौ । यजुषांषट् । साम्नांद्विः । ऋचांत्रिः । द्वौद्वौसाम्नांवर्धेत । त्रींस्त्रीनृचां । चतुरश्चतुरःप्रा-
जापत्यायाः । एकैकंशेषे । जह्यादासुरी । तान्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः । तिस्रस्तिस्रःसनाम्न्यएकैका-
ब्राह्मयः । प्राग्यजुषामार्ष्यइति ॥ ३ ॥ पादः । इयादिपूरणः । गायत्र्यावसवः । जगत्याआदित्याः । विराजो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिशः । त्रिष्टुभोरुद्राः । एकद्वित्रिचतुष्पादुक्तपादं । आद्यंचतुष्पाद्तुभिः । क्वचित्त्रिपाद्ऋषिभिः । सापादनिचृत् । षट्कसप्तकयोर्मध्येष्टावतिपादनिचृत् । द्वौनवकौषट्कश्चनागी । विपरीतावाराही । षट्कसप्तकाष्टकैर्वर्धमानां । विपरीताप्रतिष्ठा । तृतीयंद्विपाज्जागतगायत्राभ्यां । त्रिपात्त्रैष्टुभैः । उष्णिग्गायत्रौजागतश्च । ककुम्मध्येचेदंत्यः । पुरउष्णिक्पुरः ॥४॥ परोष्णिक्परः । चतुष्पाद्ऋषिभिः । अनुष्टुप्गायत्रैः । त्रिपात्क्वचिज्जागताभ्यांच । मध्येतेच । बृहती जागतस्त्रयश्चगायत्राः । पथ्यापूर्वश्चेत्तृतीयः । न्यंकुसारिणीद्वितीयः । स्कंधोग्रीवीक्रौष्टुकेः । उरोबृहतीयास्कस्य । उपरिष्टाद्बृहत्यंते । पुरस्ताद्बृहतीपुरः । क्वचिन्नवकाश्चत्वारः । वैराजौगायत्रौच । त्रिभिर्जागतैर्महाबृहती । सतोबृहतीतांडिनः । पंक्तिर्जागतौगायत्रौच । पूर्वौचेदयुजौसतःपंक्तिः । विपरीतौच ॥ ५ ॥ आस्तारपंक्तिःपरतः । प्रस्तारपंक्तिःपुरतः । विष्टारपंक्तिरंतः । संस्तारपंक्तिर्बहिः । अक्षरपंक्तिःपंचकाश्चत्वारः । द्वावप्यल्पशः । पदपंक्तिःपंच । चतुष्कषट्कौत्रयश्च । पथ्यापंचभिर्गायत्रैः । जगतीषड्भिः । एकेनत्रिष्टुब्ज्योतिष्मती । तथाजगती । पुरस्ताज्ज्योतिःप्रथमेन । मध्येज्योतिर्मध्यमेन । उपरिष्टाज्ज्योतिरंत्येन । एकस्मिन्पंचकेछंदःशंकुमती । षट्केककुब्मती । त्रिपादनिष्ठमध्यापिपीलिकमध्या । विपरीतायवमध्या । ऊनाधिकेनैकेननिचृद्भुरिजौ । द्वाभ्यांविराट्स्वराजौ । आदितःसंदिग्धे ॥ ६ ॥ देवतादितश्च । अग्निःसवितासोमोबृहस्पतिर्मित्रावरुणाविंद्रोविश्वेदेवादेवताः । स्वराःषड्जऋषभगांधारमध्यमपंचम-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धैवतनिषादाः। सितसारंगपिशंगकृष्णनीललोहितगौरावर्णाः। आग्निवेश्यकाश्यपगौतमांगिरसभार्गवकौशिकवासिष्ठानिगोत्राणि। श्यामान्यतिच्छंदांसि। रोचनाभाःकृतयः। अनुक्तानांकामतोवर्णाइति ॥ ७ ॥ चतुःशतमुत्कृतिः। चतुरश्चतुरस्त्यजेदुत्कृतेः। तान्यभिसंव्याप्रेभ्यःकृतिः। प्रकृत्याचोपसर्गवर्जितः। धृत्यष्टिशक्करीजगत्यः। पृथक्पृथक्पूर्वतएतान्येवैषां। द्वितीयंद्वितीयमतितः। अथलौकिकं। आत्रैष्टुभाच्चयदार्षं। पादश्चतुर्भागः। यथावृत्तसमास्तिर्वा। लःसमुद्रागणः। गौगंतमध्यादिर्न्लश्च। स्वराअर्धचार्यार्धं। अत्रायुङ्नज्। षष्ठोज्। न्लौवा। न्लौचेत्पदंद्वितीयादि। सप्तमःप्रथमादि। अंत्येपंचमः ॥ ८ ॥ षष्ठश्चल्। त्रिषुगणेषुपादःपथ्याद्येच। विपुलान्या। चपलाद्वितीयचतुर्थौंग्मध्येजौ। पूर्वेमुखपूर्वा। जघनपूर्वेतरत्र। उभयोर्महाचपला। आद्यर्धसमागीतिः। अंत्येनोपगीतिः। उत्क्रमेणोद्गीतिः। अर्धेवसुगणआर्यागीतिः। वैतालीयंद्विःस्वराअयुक्पादेयुग्वसवोंतेर्ल्गः। गौपच्छंदसिकं। आपातलिकाभ्गौग्। शेषेपरेणयुङ्नसाकं। षट्चामिश्रायुजि। पंचमेनपूर्वःसाकंप्राच्यवृत्तिः। अयुक्तृतीयेनोदीच्यवृत्तिः। आभ्यांयुगपत्प्रवृत्तकं। अयुक्चारुहासिनी ॥ ९ ॥ युगपरांतिका। गंताद्विर्वसवोमात्रासमकल्नवमः। द्वादशश्चवानवासिका। विश्लोकःपंचमाष्टमौ। चित्रानवमश्च। परयुंक्तेनोपचित्रा। एभिःपादाकुलकं। गीत्यार्यालः। शिखाविपर्यस्तार्धा। लःपूर्वश्चेज्ज्योतिः। गश्चेत्सौम्या। चूलिकैकान्नत्रिंदशेकत्रिंशदं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेग् । साग्येननसमालांग्लइति ॥ १० ॥ वृत्तं । सममर्धसमंविषमंच । समंतावत्कृत्वःकृतमर्धसमंविषमंच । राश्यूनं । ग्लितिसमानी । ग्लितिप्रमाणी । वितानमन्यत् । पादस्यानुष्टुब्वक्रं । नप्रथमात्स्नौ । द्वितीयचतुर्थयो रश्च । वान्यत् । यच्चतुर्थात् । पथ्यायुजोज् । विपरीतैकीयं । चपलायुजोन् । विपुलायुग्लःसप्तमः । सर्वतःसैतव-स्य । भ्रौन्तौच । प्रतिपादंचतुर्वृद्ध्यापदचतुरूर्ध्वं । गावंतआपीडः ॥ ११ ॥ गावादौचेत्प्रत्यापीडः । प्रत्यापीडो-गावादौच । प्रथमस्यविपर्यासेमंजरीलवल्यमृतधाराः । उद्गतामेकतसजौस्लौन्सौज्गौभ्नौज्लौग्स्जौस्जौग् । तृती-यस्यसौरभकंनौभ्गौ । ललितंनौसौ । उपस्थितप्रचुपितंपृथगाद्यम्सौज्भौगौस्नौज्रौग्नौस्नौन्जौय् । वर्धमानंतृतीये-नौस्नौन्सौ । शुद्धविराळृषभंतज्राः । अर्धे । उपचित्रकंसौस्लौग्भौभ्गौग् । द्रुतमध्याभौभ्गौग्न्जौज्यौ । वेगवतीसौ-स्गौभौभ्गौग् । भद्रविराट्तजौगौम्सौज्गौग् । केतुमतीस्जौस्गौभ्रौन्गौग् । आख्यानकीतौज्गौग्ज्तौज्गौग् । विप-रीताख्यानकीज्तौज्गौग्तौज्गौग् । हरिणप्लुतासौस्लौग्नभौभ्रौ । अपरवक्रंनौलौग्नजौज्रौ । पुष्पिताग्रानौयौन्जौ-ज्रौग् ॥ १२ ॥ यवमतीजौजौज्रौज्रौग् । शिखैकान्नत्रिंशदेकत्रिंशदंतेग् । खंजामहत्ययुजीति ॥ १३ ॥ यतिर्वि-र्विच्छेदः । तनुमध्यात्यौ । कुमारललिताज्सौग् । माणवकाक्रीडितकंभ्तौल्गौ । चित्रपदाभौगौ । विद्युन्मालामौ-गौ । भुजगशिशुभृतानौम् । हलमुखीनौस् । शुद्धविराण्म्सौज्गौ । पणवोन्नौयगौ । रुक्मवतीभ्मौस्गौ । मयूरसा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिणीजौंगौं । मत्ताम्भौस्गौ । उपस्थितात्जौज्गौ । एकरूपंसौज्गौग् । इंद्रवज्रातौज्गौग् । उपेंद्रवज्राज्तौज्गौग् । वाद्यंतावुपजातयः । दोधकंम्भौभ्गौग् । शालिनीम्तौत्गौग्समुद्रऋषयः ॥ १४ ॥ वातोर्मीम्भौत्गौग्च । भ्रमरविलसितंम्भौन्लौग् । रथोद्धतानौंलौंग् । स्वागतानौंभ्गौग् । वृत्तानौस्नौग् । श्येनीजौंलौंग् । जगती । वंशस्थाज्तौज्रौ । इंद्रवंशातौज्रौ । द्रुतविलंबितंन्भौभ्रौ । तोटकंसः । पुटोनौम्यौवसुसमुद्राः । जलोद्धतगतिर्ज्सौंज्सौरसर्तवः । भुजंगप्रयातंयः । स्रग्विणीरः । प्रमिताक्षरास्जौसौ । वैश्वदेवीमौयाविंद्रियऋषयः । नवमालिनीन्जौभ्याविति ॥ १५ ॥ प्रहर्षिणीम्नौज्रौग्त्रिकदशकौ । रुचिराज्भौस्जौग्समुद्रनवकौ । मत्तमयूराम्तौय्सौग् । असंबाधाम्तौन्सौगाविंद्रियनवकौ । अपराजितानौसौंलगौस्वरऋषयः । प्रहरणकलितानौभ्नौल्गौच । वसंततिलकाद्भौजौगौ । सिंहोन्नताकाश्यपस्य । उद्धर्षिणीसैतवस्य । चंद्रावर्तानौनौस् । मालर्तुनवकौचेत् । मणिगुणनिकरोवस्वृषयः । मालिनीनौम्यौय्च । ऋषभगजविलसितंभ्रौनौन्गौस्वरनवकौ । हरिणीन्सौम्रौस्लौग्रससमुद्रऋषयः । पृथ्वीज्सौज्सौय्लौग्वसुनवकौ । वंशपत्रपतितंभ्रौन्भौन्लौग्दिगृषयः । मंदाक्रांताम्भौन्तौद्गौग्समुद्रर्तुस्वराः । शिखरिणीय्मौन्सौभ्लौगृतुरुद्राः । कुसुमितलतावेल्लिताम्तौन्यौयाविंद्रियर्तुस्वराः ॥ १६ ॥ शार्दूलविक्रीडितंम्सौज्सौतौगादित्यऋषयः । सुवदनाम्रौभ्नौय्भौल्गौस्वरऋषिरसाः । ग्लितिवृत्तं । स्रग्धराम्रौभ्नौयौय्त्रिःसप्तकाः । मद्रकंभ्रौत्रौत्रौन्गौ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिगादित्याः । अश्वललितंन्जौभ्जौभ्जौभ्लौग्रुद्रादित्याः । मत्ताक्रीडामौद्भौनौन्लौग्वसुपंचदशकौ । तन्वीभ्तौन्सौ-
भौन्यौद्विरादित्याः । क्रौंचपदाभ्मौस्भौनौनौग्भूतेंद्रियवस्वृषयः । भुजंगविजृंभितंमौद्भौनौसौंल्गौवसुरुद्रऋषयः ।
अपवाहकोन्नौनौनौन्सौगौनवकर्तुरसेंद्रियाणि । दंडकोनौरः । प्रथमश्चंडवृष्टिप्रयातः । अन्यत्ररातमांडव्याभ्यां ।
शेषःप्रचितइति ॥ १७ ॥ अत्रानुक्तंगाथा । द्विकौग्लौ । मिश्रौच । पृथग्लामिश्राः । वसवस्त्रिकाः । लर्धे ।
सैकेग् । प्रतिलोमगुणंद्विर्लाद्यं । ततोग्येकंजह्यात् । द्विरर्धे । रूपेशून्यं । द्विःशून्ये । तावदर्धेतद्गुणितं । द्विर्ह्यूनं ।
तदंतानां । एकोनेद्धा । परेपूर्णपरेपूर्णमिति ॥ १८ ॥ मयद्वादशधीःपंचदशछंदःषोडशपादःपरोष्णिक्प्रस्तारपंक्ति-
र्विंशतिर्विंशतिरेकविंशतिर्देवतादितोष्टौचतुःशतंषष्ठोविंशतिर्विंशतिर्युगपरांतिकात्रयोदशवृत्तंगावादौविंशतिर्विंशति-
र्यवमतीत्रीणियतिर्विंशतिर्वातोर्मीमष्टादशप्रहर्षिणीविंशतिःशार्दूलविक्रीडितंपञ्चदशात्रानुक्तंसप्तदशाष्टादश ॥ १९ ॥
इतिछंदःसमाप्तः ॥ ॥ ॥

॥ इतिवेदांगछंदःसमाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ निघंटुः यास्कः ।

श्रीगणेशायनमः ॥ हरिःॐम् ॥ गौः । ग्मा । ज्मा । क्ष्मा । क्षा । क्षमा । क्षोणी । क्षितिः । अवनिः । उर्वी । पृथ्वी । मही । रिपः । अदितिः । इळा । निर्ऋतिः । भूः । भूमिः । पृषा । गातुः । गोत्रेत्येकविंशतिःपृथिवीनामधेयानि ॥ १ ॥ हेम । चंद्रं । रुक्मं । अयः । हिरण्यं । पेशः । कृशनं । लोहं । कनकं । कांचनं । भर्म । अमृतं । मरुत् । दत्रं । जातरूपमितिपंचदशहिरण्यनामानि ॥ २ ॥ अंबरं । वियत् । व्योम । बर्हिः । धन्व । अंतरिक्षं । आकाशं । आपः । पृथिवी । भूः । स्वयंभूः । अध्वा । पुष्करं । सगरः । समुद्रः । अध्वरमितिषोळशांतरिक्षनामानि ॥ ३ ॥ स्वः । पृश्निः । नाकः । गौः । विष्टप् । नभइतिषट्साधारणानि ॥ ४ ॥ खेदयः । किरणाः । गावः । रश्मयः । अभीशवः । दीधितयः । गभस्तयः । वनं । उस्राः । वसवः । मरीचिपाः । मयूखाः । सप्तऋषयः । साध्याः । सुपर्णाइतिपंचदशरश्मिनामानि ॥ ५ ॥ आताः । आशाः । उपराः । आष्ठाः । काष्ठाः । व्योम । ककुभः । हरितइत्यष्टौदिङ्नामानि ॥ ६ ॥ श्यावी । क्षपा । शर्वरी । अक्तुः । ऊर्म्या । राम्या । यम्या । नम्या । दोषा । नक्ता । तमः । रजः । असिक्नी । पयस्वती । तमस्वती । घृताची । शिरिणा । मोकी । शोकी । ऊधः । पयः । हिमा । वस्वीतित्रयोविंशतीरात्रिनामानि ॥ ७ ॥ विभावरी । सूनरी । भास्वती । ओ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंती । चित्रामघा । अर्जुनी । वाजिनी । वाजिनीवती । सुन्नावरी । अहना । द्योतना । श्वेत्या । अरुषी । सूनृता । सूनृतावती । सूनृतावरीतिषोळशोषोनामानि ॥ ८ ॥ वस्तोः । द्युः । भानुः । वासरं । स्वसराणि । घ्रंसः । घर्मः । घृणः । दिनं । दिवा । दिवेदिवे । द्यविद्यवीतिद्वादशाहर्नामानि ॥ ९ ॥ अद्रिः । ग्रावा । गोत्रः । वलः । अश्मः । पुरुभोजाः । वलिशानः । अश्मा । पर्वतः । गिरिः । व्रजः । चरुः । वराहः । शंबरः । रौहिणः । रैवतः । फलिगः । उपरः । उपलः । चमसः । अहिः । अभ्रं । बलाहकः । मेघः । दतिः । औदनः । वृषंधिः । वृत्रः । असुरः । कोशइतित्रिंशन्मेघनामानि ॥ १० ॥ श्लोकः । धारा । इळा । गौः । गौरी । गांधर्वी । गभीरा । गंभीरा । मंद्रा । मंद्राजनी । वाशी । वाणी । वाणीची । वाणः । पविः । भारती । धमनिः । नाळीः । मेळिः । मेना । सूर्या । सरस्वती । निवित् । स्वाहा । वग्नुः । उपब्दिः । मायुः । काकुत् । जिह्वा । घोषः । स्वरः । शब्दः । स्वनः । ऋक् । होत्रा । गीः । गाथा । गणः । धेना । ग्नाः । विपा । नना । कशा । धिषणा । नौः । अक्षरं । मही । अदितिः । शची । वाक् । अनुष्टुप् । धेनुः । वल्गुः । गल्दा । सरः । सुपर्णी । बेकुरेतिसप्तपंचाशद्वाङ्नामानि ॥ ११ ॥ अर्णः । क्षोदः । क्षद्म । नभः । अंभः । कबंधं । सलिलं । वाः । वनं । घृतं । मधु । पुरीषं । पिप्पलं । क्षीरं । विषं । रेतः । कशः । जन्म । बृबूकं । बुसं । तुग्र्या । बर्बुरं । सुक्षेम ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धरुणँ । सुरा । अरारिंदानि । ध्वस्मन्वत् । जामि । आयुधानि । क्षपः । अहिः । अक्षरँ । स्रोतः । तृप्तिः । रसः । उदकं । पयः । सरः । भेषजं । सहः । शवः । यहः । ओजः । सुखं । क्षत्रं । आवयाः । शुभँ । यादुः । भूतं । भुवनं । भविष्यत् । आपः । महत् । व्योम । यशः । महः । सर्णीकं । स्वृतीकं । सतीनं । गहनं । गभीरं । गंभरँ । ईं । अन्नँ । हविः । सह्म । सदनं । ऋतं । योनिः । ऋतस्ययोनिः । सत्यं । नीरं । रयिः । सत् । पूर्णं । सर्वं । अक्षितं । बर्हिः । नाम । सर्पिः । अपः । पवित्रँ । अमृतँ । इंदुः । हेम । स्वः । सर्गाः । शंबरं । अभ्वँ । वपुः । अंबु । तोयँ । तूयँ । कृपीटं । शुक्रं । तेजः । स्वधा । वारिँ । जलं । जलाषं । इदमित्येकशतमुदकनामानि ॥ १२ ॥ अवनयः । यव्याः । खाः । सीराः । स्रोत्याः । एन्यः । धुनयः । रुजानाः । वेक्षणाः । खादोअर्णाः । रोधचक्राः । हरितः । सरितः । अग्रुवः । नभन्वः । वध्वः । हिरण्यवर्णाः । रोहितः । सस्रुतः । अर्णाः । सिंधवः । कुल्याः । वर्यः । उर्व्यः । इरावत्यः । पार्वत्यः । सवैत्यः । ऊर्जस्वत्यः । पयस्वत्यः । तरस्वत्यः । सरस्वत्यः । हरस्वत्यः । रोधस्वत्यः । भास्वत्यः । अजिराः । मातरः । नद्यइतिसप्तत्रिंशन्नदीनामानि ॥ १३ ॥ अत्यः । हयः । अर्वा । वाजी । सप्तिः । वह्निः । दधिक्राः । दधिक्रावा । एतग्वः । एतशः । पैद्वः । दौर्गहः । औच्चैश्रवसः । तार्क्ष्यः । आशुः । ब्रध्नः । अरुषः । मांश्चत्वः । अव्यथयः । श्येनासः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुपर्णाः । पतंगाः । नरः । ह्वार्याणां । हंसासः । अश्वाइतिषड्विंशतिरश्वनामानि ॥ १४ ॥ हरीइंद्रस्य । रोहितोग्नेः । हरितआदित्यस्य । रासभावश्विनोः । अजाःपूष्णः । पृषत्योमरुतां । अरुण्योगावउषसां । श्यावाः सवितुः । विश्वरूपाबृहस्पतेः । नियुतोवायोरितिदशादिष्टोपयोजनानि ॥ १५ ॥ भ्राजते । भ्राशते । भ्राश्यति । दीदयति । शोचति । मंदते । भंदते । रोचते । ज्योतते । द्योतते । द्युमदित्येकादशज्वलतिकर्माणः ॥ १६ ॥ जमत् । कल्मलीकिनं । जंजणाभवन् । मल्मलाभवन् । अर्चिः । शोचिः । तपः । तेजः । हरः । हरिणिः । शृंगाणिशृंगाणीत्येकादशज्वलतोनामधेयानि ॥ १७ ॥ गौर्हेमांबरंस्वरुःखेदयआताःश्यावीविभावरीवस्तोरद्विश्लोकोर्णोवनयोत्योहरीइंद्रस्यभ्राजतेजमदितिसप्तदश ॥ इतिनिघंटेप्रथमोऽध्यायः ॥ १ ॥

अपः । अन्नं । दंसः । वेषः । वेपः । विष्वी । व्रतं । कर्वरं । करुणं । शकर्म । क्रतुः । करणानि । करांसि । करिक्रत् । करंती । चक्रत् । कर्त्वं । कर्तोः । कर्तवै । कृत्वी । धीः । शचीं । शमीं । शिमीं । शक्तिः । शिल्पमितिषड्विंशतिःकर्मनामानि ॥ १ ॥ तुक् । तोकं । तनयः । तोकम । तकम । शेषः । अन्नं । गयः । जाः । अपत्यं । यहुः । सूनुः । नपात् । प्रजा । बीजमितिपंचदशापत्यनामानि ॥ २ ॥ मनुष्याः । नरः । धवाः । जंतवः । विशः । क्षितयः । कृष्टयः । चर्षणयः । नहुषः । हरयः । मर्याः । मर्त्याः । मर्ताः । व्राताः । तुर्वशाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रुह्यवः । आयवः । यदवः । अनवः । पूरवः । जगतः । तस्थुषः । पंचजनाः । विवस्वतः । पृतनाइतिपंचविंशतिर्मनुष्यनामानि ॥ ३ ॥ आयती । च्यवाना । अभीशू । अग्मवाना । विनंगृसौ । गभस्ती । करस्नौ । बाहू । भुरिजौ । क्षिपस्ती । शक्करी । भरित्रेइतिद्वादशबाहुनामानि ॥ ४ ॥ अग्रुवः । अण्व्यः । क्षिपः । व्रिशः । शर्याः । रशनाः । धीतयः । अथर्यः । विपः । कक्ष्याः । अवनयः । हरितः । स्वसारः । जामयः । सनाभयः । योक्राणि । योजनानि । धुरः । शाखाः । अभीशवः । दीधितयः । गभस्तयइतिद्वाविंशतिरंगुलिनामानि ॥ ५ ॥ वश्मि । उशमसि । वेति । वेनति । वेसति । वांछति । वष्टि । वनोति । जुषते । हर्यति । आचके । उशिक् । मन्यते । छन्त्सत् । चाकनत् । चकमानः । कनति । कानिषदित्यष्टादशकांतिकर्माणः ॥ ६ ॥ अंधः । वाजः । पयः । श्रवः । पृक्षः । पितुः । सुतः । सिनं । अवः । क्षु । धासिः । इरा । इळा । इषं । ऊर्क् । रसः । स्वधा । अर्कः । क्षद्म । नेमः । ससं । नमः । आयुः । सूनृता । ब्रह्म । वर्चः । कीलालं । यशइत्यष्टाविंशतिरन्ननामानि ॥ ७ ॥ आवयति । भर्वति । बभस्ति । वेति । वेवेष्टि । अविष्यन् । बप्सति । भसथः । बब्धां । ह्वरतीतिदशात्तिकर्माणः ॥ ८ ॥ ओजः । पाजः । शवः । तवः । तरः । त्वक्षः । शर्धः । बाधः । नृम्णं । तविषी । शुष्मं । शुष्णं । दक्षः । वीळु । च्यौत्नं । शूषं । सहः । यहः । वधः । वर्गः । वृजिनं । वृक् । मज्मना । पौंस्यानि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्णसिः । द्रविणं । स्पृंद्रासः । शंबरमित्यष्टाविंशतिर्बलनामानि ॥ ९ ॥ मघं । रेक्णः । रिक्थं । वेदः । वारिवः । श्वात्रं । रत्नं । रयिः । क्षत्रं । भगः । मीढुं । गयः । द्युम्नं । इंद्रियं । वसु । रायः । राधः । भोजनं । तना । नृम्णं । बंधुः । मेधा । यशः । ब्रह्म । द्रविणं । श्रवः । वृत्रं । वृतमित्यष्टाविंशतिरेवधननामानि ॥ १० ॥ अघ्न्या । उस्रा । उस्रिया । अही । मही । अदितिः । इळा । जगती । शक्करीतिनवगोनामानि ॥ ११ ॥ रेळते । हेळते । भार्मते । भृणीयते । भ्रीणाति । भ्रेषति । दोधति । वनुष्यति । कंपते । भोजतइतिदशकुध्यतिकर्माणः ॥ १२ ॥ हेळः । हरः । हृणिः । त्यजः । भार्मः । एहः । ह्वरः । तपुषी । जूर्णिः । मन्युः । व्यथिरित्येकादश-क्रोधनामानि ॥ १३ ॥ वर्तते । अयते । लोटते । लोठते । स्यंदते । कसति । सर्पति । स्यमति । स्रवति । संस्रते । अवति । श्रोतति । ध्वंसति । वेनति । मार्ष्टि । भुरण्यति । शवति । कालर्यति । पेलर्यति । कंठति । पिस्यति । बिस्यति । मिस्यति । प्रवते । प्लवते । च्यवते । कवते । गवते । नवते । क्षोदति । नक्षति । सक्षति । न्यक्षति । सचति । ऋच्छति । तुरीयति । चतति । अतति । गाति । इयक्षति । सश्चति । त्सरति । रंहति । यतते । भ्रमति । भ्रजति । रजति । लजति । क्षियति । धमति । मिनाति । ऋण्वति । क्रुणोति । स्वरति । सिसर्ति । वेषिष्टि । योषिष्टि । रिणाति । रीयते । रेजति । दध्यति । दुभ्नोति । युध्यति । धन्वति । अरुषति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आर्यति । डीयते । तर्कति । दीयति । ईर्षति । फर्णति । हर्नति । अर्दति । मर्दति । सर्सृते । नसते । हर्यति । इयर्ति । ईर्ते । ईर्खते । ऋयति । श्वात्रति । गंति । आगंनीगंति । जंगंति । जिन्वति । जसति । गमति । धर्ति । ध्रार्ति । ध्रयति । वहते । रथुर्यति । जेहते । ष्वःकति । क्षुंपति । प्सार्ति । वार्ति । यार्ति । इषर्ति । द्रार्ति । द्रूळति । एजति । जमति । जर्वति । वंचति । अनिति । पर्वते । हंति । सेधति । अगन् । अजगन् । जिगाति । पर्तति । इन्वति । द्रमति । द्रर्वति । वेति । हयैतात् । एति । जगायात् । अयुथुरितिद्वाविंशंशतंगतिकर्माणः ॥ १४ ॥ नु । मक्षु । द्रुवत् । ओषं । जीराः । जूर्णिः । शूर्ताः । शूघनासः । शीभं । तूषु । तूयं । तूर्णिः । अजिरं । भुरण्युः । शु । आशु । प्राशुः । तूतुजिः । तूतुजानः । तुज्यमानासः । अञ्जाः । साचीवित् । द्युगत् । ताजत् । तरणिः । वातरंहाइतिषड्विंशतिःक्षिप्रनामानि ॥ १५ ॥ तळित् । आसात् । अंबरं । तुर्वशे । अस्तमीके । आके । उपाके । अर्वाके । अंतमानां । अवमे । उपमइत्येकादशांतिकनामानि ॥ १६ ॥ रणः । विवाक् । विखादः । नदनुः । भरे । आक्रंदे । आह्वे । आजौ । पृतनाज्यं । अभीके । समीके । ममसत्यं । नेमधिता । संकाः । समितिः । समनं । मीढ्वे । पृतनाः । स्पृधः । मृधः । पृत्सु । समत्सु । समर्ये । समरणे । समोहे । समिथे । संख्ये । संगे । संयुगे । संगथे । संगमे । वृत्रतूर्यं । पृक्षे । आणौ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शूरसातौ । वाजसातौ । समनीके । खले । खजे । पौंस्ये । महाधने । वाजे । अज्म । सह्म । संयत् । संवतइतिषट्चत्वारिंशत्संग्रामनामानि ॥ १७ ॥ इन्वति । नक्षति । आक्षाणः । आनट् । आष्ट । आपनः । अशत् । नशत् । आनशे । अश्नुतइतिदशव्याप्तिकर्माणः ॥ १८ ॥ दभ्नोति । श्नथति । ध्वरति । धूर्वति । वृणक्ति । वृश्चति । कृण्वति । कृंतति । श्वसिति । नभते । अर्दयति । स्तृणाति । स्नेहयति । यातयति । स्फुरति । स्फुलति । निवपंतु । अवतिरति । वियातः । आतिरत् । तळित् । आखंडल । द्रूणाति । रम्णाति । शृणाति । शम्नाति । तृणेढि । ताढि । नितोशते । निर्बर्हयति । मिनाति । मिनोति । धमतीतित्रयस्त्रिंशद्धधकर्माणः ॥ १९ ॥ दिद्युत् । नेमिः । हेतिः । नमः । पविः । सृकः । वृकः । वधः । वज्रः । अर्कः । कुत्सः । कुलिशः । तुंजः । तिग्मः । मेनिः । स्वधितिः । सायकः । परशुरित्यष्टादशवज्रनामानि ॥ २० ॥ इरज्यति । पर्यते । क्षयति । राजतीतिचत्वारऐश्वर्यकर्माणः ॥ २१ ॥ राष्ट्री । अर्यः । नियुत्वान् । इनइनइतिचत्वारीश्वरनामानि ॥ २२ ॥ अपस्तुज्मनुष्याआयत्यो ग्रुवोवरम्यंधआवयत्योजोमघमघ्न्यारेळतेहेळोवर्तेतेनुतळिद्रणइन्वतिदभ्नोतिदिद्युदिरज्यतिराष्ट्रीद्वाविंशतिः ॥ इतिनैघंटुकेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥

ॐउरु । तुवि । पुरु । भूरि । शश्वत् । विश्व । परीणसा । व्यानशिः । शतं । सहस्र । सलिलं । कुविदि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिद्वादशबहुनामानि ॥ १ ॥ क्रुहन् । ह्रस्वः । निघृष्वः । मायुकः । प्रतिष्ठा । कृधु । वम्रकः । दभ्रं । अर्भकः । क्षुल्लकः । अल्पइत्येकादशह्रस्वनामानि ॥ २ ॥ महत् । ब्रध्नः । क्रुष्वः । बृहत् । उक्षितः । तवसः । तविषः । महिषः । अभ्वः । क्रुभुक्षाः । उक्षाः । विहायाः । यह्वः । ववक्षिथ । विवक्षसे । अंभृणः । माहिनः । गभीरः । ककुहः । रभसः । व्राधन् । विरप्शी । अद्भुतं । बंहिष्ठः । बर्हिषदितिपंचविंशतिर्महन्नामानि ॥ ३ ॥ गयः । कृदरः । गर्तः । हर्म्यं । अस्तं । पस्त्यं । दुरोणे । नीळं । दुर्याः । स्वसराणि । अमा । दमे । कृत्तिः । योनिः । सद्म । शरणं । वरूथं । छर्दिः । छदिः । छाया । शर्म । अज्मेतिद्वाविंशतिर्गृहनामानि ॥ ४ ॥ इरज्यति । विधेम । सपर्यति । नमस्यति । दुवस्यति । क्रुध्नोति । क्रुणद्धि । क्रुच्छति । सपति । विवासतीतिदशपरिचरण-कर्माणः ॥ ५ ॥ शिंबाता । शतरा । शातपंता । शिल्गुः । स्यूमकं । शेवृधं । मयः । सुगम्यं । सुदिनं । शुषं । शुनं । शग्मं । भेषजं । जलाषं । स्योनं । सुम्नं । शेवं । शिवं । शं । कमितिविंशतिःसुखनामानि ॥ ६ ॥ निर्णिक् । वत्रिः । वर्पः । वपुः । अमतिः । अप्सः । प्सु । अन्नं । पिष्टं । पेशः । कृशनं । मरुत् । अर्जुनं । ताम्रं । अरुषं । शिल्पमितिषोडशरूपनामानि ॥ ७ ॥ अस्रेमा । अनेमा । अनेद्यः । अनवद्यः । अनभिशस्त्यः । उक्थ्यः । सुनीथः । पाकः । वामः । वयुनमितिदशप्रशस्यनामानि ॥ ८ ॥ केतुः । केतः । चेतः । चित्तं । क्रतुः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असुः । धीः । शची । माया । वयुनं । अभिख्येत्येकादशप्रज्ञानामानि ॥ ९ ॥ बट् । श्रत् । सत्रा । अद्धा । इत्था । ऋतमितिषट्सत्यनामानि ॥ १० ॥ चिक्यत् । चाकनत् । अचक्ष्म । चष्टे । विचष्टे । विचर्षणिः । विश्वचर्षणिः । अवचाकशदित्यष्टौपश्यतिकर्माणः ॥ ११ ॥ हिकं । नुकं । सुकं । आहिकं । आकी । नकिः । माकिः । नकी । आकृतमितिनवोत्तराणिपदानिसर्वपदसमाम्नानाय ॥ १२ ॥ इदमिव । इदंयथा । अग्निर्नये । चतुरश्रिद्दधमानात् । ब्राह्मणाव्रतचारिणः । वृक्षस्यनुतेपुरुहूतवयाः । जारआभगं । मेषोभूतोऽभियंनयः । तद्रूपः । तद्वर्णः । तद्वत् । तथेत्युपमाः ॥ १३ ॥ अर्चति । गायति । रेभति । स्तोभति । गूर्धयति । गृणाति । जरते । ह्वयते । नदति । पृच्छति । रिहति । धमति । कूपायति । कूपण्यति । पनस्यति । पनायते । वल्गूयति । मंदते । भंदते । छंदति । छदयते । शशमानः । रंजयति । रजयति । शंसति । स्तौति । यौति । रौति । नौति । भनति । पणायति । पणते । सपति । पपृक्षाः । मह्यति । वाजयति । पूजयति । मन्यते । मंदति । रसति । स्वरति । वेनति । मंद्रयते । जल्पतीतिचतुश्चत्वारिंशदर्चतिकर्माणः ॥ १४ ॥ विप्रः । विप्रः । गृत्सः । धीरः । वेनः । वेधाः । कण्वः । ऋभुः । नवेदाः । कविः । मनीषी । मंधाता । विधाता । विपः । मनश्चित् । विपश्चित् । विपन्यवः । आकेनिपः । उशिजः । कीस्तासः । अद्धातयः । मतयः । मतुथाः । वाघतइतिचतुर्विंशतिर्मेधाविना-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानि ॥ १५ ॥ रेभः । जरिता । कारुः । नदः । स्तामुः । कीरिः । गौः । सूरिः । नादः । छंदः । स्तुप् । रुद्रः । कृपण्युरितित्रयोदशस्तोतृनामानि ॥ १६ ॥ यज्ञः । वेनः । अध्वरः । मेधः । विदथः । नार्यः । सवनं । होत्रा । इष्टिः । देवताता । मखः । विष्णुः । इंदुः । प्रजापतिः । धर्मइतिपंचदशयज्ञनामानि ॥ १७ ॥ भरताः । कुरवः । वाघतः । बृक्तबर्हिषः । यतस्रुचः । मरुतः । सबाधः । देवयवइत्यष्टावृत्विङ्नामानि ॥ १८ ॥ ईमहे । यामि । मन्महे । दुद्धि । शग्धि । पूर्धि । मिमीडि्ढ । मिमीहि । रिरीडि्ढ । रिरीहि । पीपरत् । यंतारः । यंधि । इषुध्यति । मदेमहि । मनामहे । मायतइतिसप्तदशयाच्ञाकर्माणः ॥ १९ ॥ दाति । दाशति । दासति । राति । रासति । पृणक्षि । पृणाति । शिक्षति । तुंजति । मंहतइतिदशदानकर्माणः ॥ २० ॥ परिस्रव । पवस्व । अभ्यर्ष । आशिषइतिचत्वारोध्येषणाकर्माणः ॥ २१ ॥ स्वपिति । सस्तीतिद्वौस्वपितिकर्माणौ ॥ २२ ॥ कूपः । कातुः । कर्तः । वव्रः । काटः । खातः । अवतः । क्रिविः । सूदः । उत्सः । ऋश्यदात् । कारोतरात् । कुशयः । केवटइतिचतुर्दशकूपनामानि ॥ २३ ॥ तृपुः । तक्का । रिभ्वा । रिपुः । रिक्का । रिहायाः । तायुः । तस्करः । वनर्गुः । हुरश्चित् । मुषीवान् । मलिम्लुचः । अघशंसः । वृकइतिचतुर्दशैवस्तेननामानि ॥ २४ ॥ निण्यं । सस्वः । सनुतः । हिरुक् । प्रतीच्यं । अपीच्यमितिषण्निर्णीतांतर्हितनामधेयानि ॥ २५ ॥ आके । पराके । पराचैः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरे । परावतइतिपंचदूरनामानि ॥ २६ ॥ प्रत्नं । प्रदिवः । प्रवयाः । सनेमि । पूर्व्यं । अह्नायेतिषट्पुराणनामानि ॥ २७ ॥ नवं । नूत्नं । नूतनं । नव्यं । इदा । इदानीमितिषळेवनवनामानि ॥ २८ ॥ प्रपित्वे । अभीके । दभ्रं । अर्भकं । तिरः । सतः । त्वः । नेमः । ऋक्षाः । स्तृभिः । वम्रीभिः । उपजिह्विका । ऊदरं । कृदरं । रंभः । पिनाकं । मेना । ग्नाः । शेपः । वैतसः । अया । एना । सिषक्तु । सचते । भ्यसते । रेजतइतिषड्विंशतिर्द्विंशउत्तराणिनामानि ॥ २९ ॥ स्वधे । पुरंधी । धिषणे । रोदसी । क्षोणी । अंभसी । नभसी । रजसी । सदसी । सद्मनी । घृतवती । बहुले । गभीरे । गंभीरे । ओण्यौ । चम्वौ । पाश्वौ । मही । उर्वी । पृथ्वी । अदिती । अही । दूरेअंते । अपारेअपारेइतिचतुर्विंशतिर्द्यावापृथिव्योर्नामधेयानिनामधेयानि ॥ ३० ॥ उर्वृ१ह-न्महद्भयइरज्यतिशिंबातानिर्णिगस्रेमाकेतुर्बट्चिक्यद्धिकमिदमिवार्चतिविप्रोरेभोयज्ञोभरताईमहेदातिपरिस्रवस्वपितिकूपस्त्रिपुर्निण्यमाकेप्रत्नंनवंप्रपित्वेस्वधेत्रिंशत् ॥ इतिनैघंटुकेतृतीयोऽध्यायः ॥ ३ ॥

ॐ जहा । निधा । शितम । मेहना । दमूनाः । मूषः । इषिरेण । कुरुतन । जठरे । तितउ । शिप्रे । मध्या । मंदू । इर्मातासः । कायमानः । लोधं । शीरं । विद्रधे । द्रुपदे । तुर्वनि । नंसते । नसतः । आहनसः । अभ्रसत् । इष्मिणः । वाहः । परितक्म्या । सुविते । दयते । नूचित् । नूच । दावने । अकूपारस्य । शिशीते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुतुकः । सुप्रायुणाः । अप्रायुवः । च्यवनः । रजः । हरः । जुहुरे । व्यंतः । क्राणाः । वाशीं । विषुणः । जामिः । पिता । शंयोः । अदितिः । एरिरे । जसुरिः । जरते । मंदिनें । गौः । गातुः । दंसयः । तूताव । चयसे । वियुते । ऋधक् । अस्याः । अस्येतिद्विषष्टिःपदानि ॥ १ ॥ सस्नि । वाहिष्ठः । दूतः । वावशानः । वार्यं । अंधः । असश्चंती । वनुष्यतिं । तरुष्यतिं । भंदनाः । आहनः । नदः । सोमोंअक्षाः । श्वात्रं । ऊतिः । हासमाने । पड्भिः । ससं । द्विता । त्राः । वराहः । स्वसराणि । शर्याः । अर्कः । पविः । वक्षः । धन्व । सिनैं । इत्था । सचा । चित । आ । द्युम्नं । पवित्रैं । तोदः । स्वंचाः । शिपिविष्टः । विष्णुः । आघृणिः । पृथुज्रयाः । अथर्युं । काणुका । अध्रिगुः । आंगूषः । आपांतमन्युः । श्मशा । उर्वशीं । वयुनैं । वाजपस्त्यं । वाजगंध्यं । गध्यैं । गधिता । कौरयाणः । तौरयाणः । अहयाणः । हरयाणः । आरितः । व्रंदी । निष्षपी । तूर्णाशं । क्षुंपैं । निचुंपुणः । पदिं । पादुः । वृकः । जोषवाकं । कृत्तिः । श्वघ्नी । समस्य । कुटस्य । चर्षणिः । शंबः । केपयः । ततुमाकृषे । अंसत्रं । काकुदं । बीरिंटे । अच्छ । परिं । ईं । सीं । एनं । एनां । सृणिरितिचतुरुत्तरमशीतिःपदानि ॥ २ ॥ आशुशुक्षणिः । आशाभ्यः । काशिः । कुणारुं । अलातृणः । सललूकैं । कत्पयं । विसुहः । वीरुधः । नक्षद्दाभं । अस्कृधोयुः । निशृंभाः । बृबदुक्थं । ऋदूदरः । ऋदूपे । पुलुकामः । असिन्वती । कपना । भाडऋजीकः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुजानाः । जूर्णिः । ओमना । उपलप्रक्षिणी । उपसि । प्रकलवित् । अभ्यर्धयज्वा । ईक्षे । क्षोणस्य । अस्मे । पार्थः । सवीमनि । सप्रथाः । विदथानि । श्रायंतः । आशीः । अजीगः । अमूरः । शशमानः । देवोदेवाच्या-कृपा । विजामातुः । ओमासः । सोमानं । अनवायं । किमीदिने । अमवान् । अमीवा । दुरितं । अप्वा । अमतिः । श्रुष्टी । पुरंधिः । रुशत् । रिशादसः । सुदत्रः । सुविदत्रः । आनुषक् । तुर्वणिः । गिर्वणसे । असूर्ते-सूर्ते । अम्यक् । यादृङ्मिन् । जारयायि । अग्रिया । चनः । पचता । शुरुधः । अमिनः । जज्झतीः । अप्रति-ष्कुतः । शाशदानः । सृप्रः । सुशिप्रः । शिप्रे । रंसु । द्विबर्हाः । अक्रः । उराणः । स्तियानां । स्तिपाः । जबारु । जरूथं । कुलिशः । तुंजः । बर्हणा । ततनुष्टिं । इलीबिशः । कियेधाः । भ्रिमिः । विष्पितः । तुरीपं । रास्पिनः । ऋंजतिः । ऋजुनीती । प्रतद्वसू । हिनोत । चोष्कूयमाणः । चोष्कूयते । सुमत् । दिविष्टिषु । दूतः । जिन्वति । अमत्रः । ऋचीषमः । अनर्शरातिं । अनर्वा । असामि । गल्दया । जल्हवः । बकुरः । बेकनाटान् । अभिधेतन । अंहुरः । बृतः । वाताप्यं । चाकन् । रथर्यति । असक्रां । आधवः । अनवब्रवः । सदान्वे । शिरिंबिठः । पराशरः । क्रिविर्दती । करूळती । दनः । शरारुः । इदंयुः । कीकटेषु । बुंदः । वृंदं । किः । उल्बं । ऋबीसमृ-बीसमितित्रयस्त्रिंशच्छतंपदानि ॥ ३ ॥ जहासस्मिमाशुशुक्षणिस्त्रीणि ॥ इतिनैघंटुकेचतुर्थोऽध्यायः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ॐ अग्निः । जातवेदाः । वैश्वानरइतित्रीणिपदानि ॥ १ ॥ द्रविणोदाः । इध्मः । तनूनपात् । नराशंसः । इळः । बर्हिः । द्वारः । उषासानक्ता । दैव्याहोतारा । तिस्रोदेवीः । त्वष्टा । वनस्पतिः । स्वाहाकृतयइतित्रयोदशपदानि ॥ २ ॥ अश्वः । शकुनिः । मंडूकाः । अक्षाः । ग्रावाणः । नराशंसः । रथः । दुंदुभिः । इषुधिः । हस्तघ्नः । अभीशवः । धनुः । ज्या । इषुः । अश्वा । अश्वाजनी । उलूखलं । वृषभः । दुघणः । पितुः । नद्यः । आपः । ओषधयः । रात्रिः । अरण्यानी । श्रद्धा । पृथिवी । अप्वा । अग्नायीं । उलूखलमुसले । हविर्धाने । द्यावापृथिवी । विपाट्छुतुद्री । आर्जीं । शुनासीरौ । देवीजोष्ट्री । देवीऊर्जाहुतीतिषट्त्रिंशत्पदानि ॥ ३ ॥ वायुः । वरुणः । रुद्रः । इंद्रः । पर्जन्यः । बृहस्पतिः । ब्रह्मणस्पतिः । क्षेत्रस्यपतिः । वास्तोष्पतिः । वाचस्पतिः । अपान्नपात् । यमः । मित्रः । कः । सरस्वान् । विश्वकर्मा । तार्क्ष्यः । मन्युः । दधिक्राः । सविता । त्वष्टा । वातः । अग्निः । वेनः । असुनीतिः । क्रतः । इंदुः । प्रजापतिः । अहिः । अहिर्बुध्न्यः । सुपर्णः । पुरूरवाइतिद्वात्रिंशत्पदानि ॥ ४ ॥ श्येनः । सोमः । चंद्रमाः । मृत्युः । विश्वानरः । धाता । विधाता । मरुतः । रुद्राः । ऋभवः । अंगिरसः । पितरः । अथर्वाणः । भृगवः । आद्याः । अदितिः । सरमा । सरस्वती । वाक् । अनुमतिः । राका । सिनीवाली । कुहूः । यमी । उर्वशी । पृथिवी । इंद्राणी । गौरी । गौः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेनुः । अघ्न्या । पथ्या । स्वस्तिः । उषाः । इळा । रोदसीतिषट्त्रिंशत्पदानि ॥ ५ ॥ अश्विनौ । उषाः । सूर्या । वृषाकपायी । सरण्यूः । त्वष्टा । सविता । भगः । सूर्यः । पूषा । विष्णुः । विश्वानरः । वरुणः । केशी । केशिनः । वृषाकपिः । यमः । अजएकपात् । पृथिवी । समुद्रः । अथर्वा । मनुः । दध्यङ् । आदित्याः । सप्तऋषयः । देवाः । विश्वेदेवाः । साध्याः । वसवः । वाजिनः । देवपत्न्योदेवपत्न्यइत्येकत्रिंशत्पदानि ॥ ६ ॥ अग्निर्द्दैविणोदाअश्वोवायुःश्येनोश्विनौषट् ॥ इतिनैघंटुकेपंचमोऽध्यायः ॥

इदं पुस्तकं पणशीकरोपाह्वलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा संस्कृतं तच्च तुकाराम जावजी इत्येतैः स्वीये " निर्णयसागराख्य " मुद्रणालये मुद्रयित्वा प्रकाशितम् । शके १८३६, सन १९१४.

॥ शिक्षादिवेदांगचतुष्टयंसमाप्तम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2319

॥ इति शिक्षादिवेदषडंगानि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.01.20 12:04
,TRANSFERRED=2020/01/22 at 12:16:39
,PAGES=38
,TYPE=STD
,NAME=S0002604
,Book Name=M-2319-SHIKSHADIVED SHADANG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection